कुवेरश्च धनैश्वर्य्यं ब्राह्मण्यञ्चैव गाधिज: ॥”
एतज्जन्मकथा विश्वामित्रशब्दे द्रष्टव्या ॥)

गाधिपुरं, क्ली, (गाधे: कौशिकस्य राज्ञ: पुरम् ।) कान्यकुब्जदेश: । इति हेमचन्द्र: । ३ । ४० ॥ (यथा राजतरङ्गिण्याम् । ४ । १३४ ।
“कन्यानां यत्र कुब्जत्वं व्यधात् गाधिपुरे मरुत् ।
तत्रैव शंसनीय: स पुमांश्चक्रे भयस्पृशाम् ॥”)

गाधिभू:, पुं, (गाधेर्भूरुत्पत्तिर्यस्य गाधिर्भूरुत्पत्तिस्थानं यस्येति वा । यद्वा गाधेर्भवति उत्पद्यते स्म । भू + भूतवर्त्तमानयोरिति क्विप् ।) विश्वामित्रमुनि: । इति शब्दरत्नावली ॥

गाधेय:, पुं, (गाधेरपत्यं पुमान् । गाधि + “इतश्चानिञ: ।” ४ । १ । १२२ । इति ढक् ।) विश्वामित्रमुनि: । इति हेमचन्द्र: । ३ । ५१४ ॥ (यथा, हरिवंशे । २७ । १७ ।
“विश्वामित्रस्तु गाधेयो राजा विश्वरथश्च ह ॥”)

गानं, क्ली, (गीयते इति । गै + भावे ल्युट् ।) गीतम् । इत्यमर: । १ । ७ । २५ ॥ (यदुक्तम्,—
“जपकोटिगुणं ध्यानं ध्यानकोटिगुणो लय: ।
लयकोटिगुणं गानं गानात् परतरं न हि ॥”)
तत्पर्य्याय: । गेयम् २ गीति: ३ गान्धर्व्वम् ४ । इति हेमचन्द्र: । २ । १६४ ॥ (गानं हि वैदिकलौकिकभेदात् द्विविधम् । तत्र वैदिकगानन्तु मुक्तिप्रदं अन्यत् लोकरञ्जनकरम् । वैदिकलौकिकयोर्मार्गदेशीति नामान्तरमपि श्रूयते । गानन्तु सामवेदादेव उत्पन्नं यदुक्तं सङ्गीतदर्पणटीकायाम् ।
“ऋग्भि: पाठ्यमभूद्गीतं सामभ्य: समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वण: स्मृता: ॥”
द्विविधसङ्गीतयोर्लक्षणमाह सङ्गीतदर्पणे । ३-६ ।
“मार्गदेशीविभागेन सङ्गीतं द्विविधं मतम् ।
द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम् ।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते ॥
गीतवादित्रनृत्यानां रक्ति: साधारणो गुण: ।
अतो रक्तिविहीनं यत् न तत् सङ्गीतमुच्यते ॥”
गानन्तु नादात्मकमेव नादस्तु यदा स्वयं राजते तदा स्वर इति प्रसिद्ध: स्यात् । स्वरस्तु षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादभेदात् सप्तविध: । एतेषां विज्ञापनार्थं एतदाश्रयीभूतद्वाविंशतिश्रुतीनां नामानि स्वरस्थितिश्च कथ्यन्ते । यथा, सङ्गीतदर्पणे । ५३—५६ ।
“तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगा: ।
दयावती रञ्जनी च रतिका चर्षभे स्थिता ॥
रौद्री क्रोधा च गान्धारे वज्रिकाथ प्रसारिणी ।
प्रीतिश्च मार्ज्जनीत्येता: श्रुतयो मध्यमाश्रिता: ॥
क्षिती रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे ।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रया: ॥
उग्रा च क्षोभिणीति द्वे निषादे वसत: श्रुती ॥”
अन्यत् विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम् ॥ *॥ गाने तु रागा रागिण्यश्च प्रयोक्तव्या: अतस्तेषां नामानि कथ्यन्ते । यथा, सङ्गीतदर्पणे स्वराध्याये । १२—१६ ।

पार्व्वत्युवाच ।
“के रागा: काश्च रागिण्य: का वेला ऋतवश्च के ।
किं रूपं कथमुद्धारो वद देव ! प्रसादत: ॥”

ईश्वर उवाच ।
“श्रीरागोऽथ वसन्तश्च भैरव: पञ्चमस्तथा ।
मेघरागो बृहन्नाट: षडेते पुरुषाह्वया: ॥”
इति षट् रागा: ॥

अथ रागिण्य: ।
“मालश्री त्रिवणी गौरी केदारी मधुमाधवी ।
तत: पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गना: ॥
देशी देवगिरी चैव वराटी तोड़िका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गना: ॥
भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा ।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गना: ॥
विभाषा चाथ भूपाली कर्णाटी वड़हंसिका ।
मालवी पटमञ्जर्य्या सहैता: पञ्चमाङ्गना: ॥
मल्लारी सौरटी चैव सावेरी कौशिकी तथा ।
गान्धारी हरशृङ्गारा मेघरागस्य योषित: ॥
कामोदी चैव कल्याणी आभिरी नाटिका तथा ।
सारङ्गी नट्टहम्बीरा नट्टनारायणाङ्गना: ॥”
इति षट्त्रिंशत् रागिण्य: ॥
रागरागिणीनां विशेषविवरणन्तु तत्तच्छब्दे गानस्य अन्यद्विवरणं गीतशब्दे च दर्शनीयम् ॥) ध्वनि: । इति धरणी ॥

गानिनी, स्त्री, (गानं रोगादिनाशकतया प्रशस्तगीतिर्विद्यतेऽस्या: । गान + इनि: ।) वचा । इति शब्दचन्द्रिका ॥ (गानं सङ्गीतविद्या गति: स्तुतिश्चास्त्यस्या इति व्युत्पत्त्या यथाक्रमं गानज्ञा गतिमती स्तवयुक्ता च स्त्री । इति व्युत्पत्तिलब्धोऽर्थ: ॥)

गान्तु:, त्रि, (गच्छतीति । गम गतौ + “क्रमिगमिक्षमीति ।” उणा । ५ । ४३ । इति तुन् वृद्धिश्च ।) गन्ता । इत्युणादिकोष: ॥ गायक: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

गान्त्री, स्त्री, (गन्त्री एव । स्वार्थे अण् । ततो ङीप् ।) गन्त्री । वृषवाह्यशकट: । गरुर गाड़ि इति भाषा । इत्यमरटीकायां रायमुकुट: ॥ (क्वचित् क्लीवलिङ्गत्वमपि दृश्यते ॥)

गान्दिनी, स्त्री, (गां पशुं जीवजातमित्यर्थ: दायति शोधयतीति । दै प शोधने + णिनि: + ङीप् । पृषोदरात् साधु: ।) गङ्गा । इति त्रिकाण्डशेष: शब्दरत्नावली च ॥ (गां धेनुं ददाति प्रतिदिनमित्यर्थ: । दा दाने + णिनि + ङीप् । पृषोदरात् साधु: ।) अक्रूरमाता । इति श्रीभागवतम् ॥ (अस्या नामनिरुक्तिर्यथा, हरिवंशे । ३४ । ७—११ ।
“श्वफल्क: काशिराजस्य सुतां भार्य्यामविन्दत ।
गान्दिनीं नाम सा गास्तु ददौ विप्रेषु नित्यश: ॥
सा मातुरुदरस्था वै बहून् वर्षगणान् किल ।
निवसन्ती न वै जज्ञे गर्भस्थां तां पिताब्रवीत् ॥
जायस्व शीघ्रं भद्रन्ते किमर्थञ्चेह तिष्ठसि ।
प्रोवाच चैनन्तु गर्भस्था सा कन्या गान्दिने दिने ॥
यदि दद्यां ततो जाये पितरं प्रत्युवाच ह ।
तथेत्युक्त्वा च तां चास्या: पिता काममपूरयत् ॥
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रिय: ।
अक्रूर: सुषुवे तस्यां श्वफल्काद्भूरिदक्षिण: ॥” *॥
गान्धिनीति पाठोऽपि क्वचित् दृश्यते ॥)

गान्दिनीसुत:, पुं, (गान्दिन्या गङ्गाया: सुत: ।) भीष्म: । इति त्रिकाण्डशेष: ॥ (कार्त्तिकेय: । इति व्युत्पत्तिलब्धोऽर्थ: ॥ गान्दिन्यास्तदाख्यया प्रसिद्धाया श्वफल्कभार्य्याया: सुत: ।) अक्रूर: । इति श्रीभागवतम् ॥ (यथा, माघे । १७ । १२ ।
“विलङ्घितस्थितिमभिवीक्ष्य रुष्टया
रिपोर्गिरा गुरुमपि गान्दिनीसुतम् ॥”)

गान्धर्व्वं, क्ली, (गन्धर्व्वस्य इदं गन्धर्व्वैः गीतं वा । गन्धर्व्व + अण् । यद्वा, गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण् ।) गानम् । इति हेमचन्द्र: ॥ (यथाह दन्तिल: ।
“पदस्थस्वरसङ्घातस्तालेन सङ्गतस्तथा ।
प्रयुक्तश्चावधानेन गान्धर्व्वमभिधीयते ॥”
यथा च महाभारते । १३ । १९ । ४६ ।
“अवादयंश्च गन्धर्व्वा वाद्यानि विविधानि च ।
अथ प्रवृत्ते गान्धर्व्वे दिव्ये ऋषिरुपाविशत् ॥”
गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण् । गन्धर्व्वदेवताकमस्त्रम् । यथा, रघु: । ५ । ५७ ।
“गान्धर्व्वमादत्स्व यत: प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते ॥”)

गान्धर्व्व:, पुं, (गन्धर्व्व एव । “प्रज्ञादिभ्यश्च ।” ५ । ४ । ३८ । इत्यण् ।) गन्धर्व्व: । इति हेमचन्द्र: । २ । १६४ ॥ (भारतवर्षीयोपद्वीपविशेष: । यथा, विष्णुपुराणे ।
“भारतस्यास्य वर्षस्य नवभेदान्निशामय ।
इन्द्रद्वीप: कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुण: ।
अयन्तु नवमस्तेषां द्वीप: सागरसंवृत: ॥”)
अष्टप्रकारविवाहान्तर्गतविवाहविशेष: । यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चय: स: । (तल्लक्षणं यथा, मनौ । ३ । ३२ ।
“इच्छयाऽन्योन्यसंयोग: कन्यायाश्च वरस्य च ।
गान्धर्व्व: स तु विज्ञेयो मैथुन्य: कामसम्भव: ॥”
स च क्षत्रियाणामेव धर्म्म्य: । यथा, तत्रैव । ३ । २६ ।
“गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ ॥”)
तत्सम्बन्धिनि त्रि ॥ (यथा, काशीखण्डे ।
“गान्धर्व्वस्त्वेष लोकोऽमी गन्धर्व्वाश्च शुभव्रता: ॥”
गन्धर्व्वदेशोद्भवे च । यथा, महाभारते । १ । २२६ । १० ।
“उपेतं राजतैरश्वैर्गान्धर्व्वैर्हेममालिभि: ।
पाण्डुराभ्रप्रतीकाशैर्मनोवायुसमैर्जवे ॥”)

गान्धारं, क्ली, (गन्ध एव गान्धं सुगन्धं ऋच्छतीति । ऋ गतौ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । यद्वा, गान्धाराणान्तद्देशवासिनां प्रियम् । अण् ।) गन्धरस: । इति त्रिकाण्डशेष: ॥